# Shri Totadrinatha Mangalashasanam

# श्री तोताद्रिनाथ मङ्गलाशासनम्

## Document Information

Text title : totAdrinAthamangalAshAsanam

File name : totAdrinAthamangalAshAsanam.itx

Category : vishhnu, mangala

Location : doc_vishhnu

Author : Gopala Ayyangar

Transliterated by : TCA Venkatesan

Proofread by : TCA Venkatesan

Acknowledge-Permission: http://raghavanhema.blogspot.com/2011/03/srivaishnava-sampradhaya-books.html acharya.org

Latest update : June 3, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 3, 2022

*sanskritdocuments.org*

# श्री तोताद्रिनाथ मङ्गलाशासनम्

श्रीः ।
श्रीमते रामानुजाय नमः ।
श्रीमद् वरवर मुनये नमः ।
श्रीमद् वानमहाचल गुरुभ्यो नमः ।
अथ श्रीतोताद्रिनाथमङ्गलाशासनम् ।
विष्णुचित्त मुनीन्द्रस्य विमलाङ्घ्रियुगे नतिम् ।
विधाय देवदेवस्य विदधे मङ्गलावळिम् ॥ १॥

श्रीदेवि भूमिसेव्याय दिनकृच्चन्द्रभासिने ।
देवीयुग्मोपवीज्याय देवदेवाय मङ्गलम् ॥ २॥

मार्कण्डेयेन भृगुणा सेनान्या च गरुत्मता ।
वन्द्याय सततं वानमहाशैलाय मङ्गलम् ॥ ३॥

शेषतल्पपनिषण्णाय शेषभूतखिलात्मने ।
शेषिताश्रितदोषाय शेषिणे मम मङ्गलम् ॥ ४॥

श्रीवैकुण्ठविमानाग्र्ये श्रीपङ्काब्जसरस्तटे ।
स्वयं व्यक्ताय मेदिन्यां सुरनाथाय मङ्गलम् ॥ ५॥

प्रयोगचक्रहस्ताय प्रणताभयदायिने ।
प्रसन्नवदनाब्जाय प्रफुल्लाक्षाय मङ्गलम् ॥ ६॥

अङ्कविन्यस्तसव्यश्री हस्तेनाश्रयणोन्मुखान् ।
आरोपयितुमुत्सङ्गं आदृतायेव मङ्गलम् ॥ ७॥

प्रीतिपुष्करिणीरूप लक्ष्मीकौस्तुभवक्षसे ।
प्रलम्बकुण्डलानृष्ट वनमालाय मङ्गलम् ॥ ८॥

प्रकाशाय प्रथमतः प्रियरोमशयोगिनः ।
प्रमग्नोद्धरणाद् भूमेः प्रियकाराय मङ्गलम् ॥ ९॥

नैमिशारण्यवासानां व्रतिनां प्रीतिहेतवे ।
भौमदेवसुतार्तिघ्ने भव्यरूपाय मङ्गलम् ॥ १०॥

पङ्कपद्मसरस्नातां सङ्कल्पफलयिष्णवे ।
किङ्करीकृतलोकाय पङ्कजाक्षाय मङ्गलम् ॥ ११॥

वैनतेयानुरोधेन वैखानसमुनिं गुरुम् ।
नियुज्य निजपूजायां नित्यहृष्टाय मङ्गलम् ॥ १२॥

गुणशीलस्य राजर्षेः शुनो रूपेण शोचतः ।
विनोदिताग्रयशापाय व्योमाद्रीशाय मङ्गलम् ॥ १३॥

पद्मतीर्थतटीतप्यत् पद्मापाणिगृहीतये ।
पद्मजन्मप्रगीताय पद्मनाभाय मङ्गलम् ॥ १४॥

शठकोपशरण्याय सर्वदेवान्तरात्मने ।
सहस्रगीतिसाराय सुपर्वेशाय मङ्गलम् ॥ १५॥

वानाद्रियोगिना नित्यं वरमङ्कारमामुदे ।
ननोपचारसेव्याय मानातीताय मङ्गलम् ॥ १६॥

सर्वोत्सवसमाजेषु शताधिकसुवैष्णवैः ।
चतुस्सहश्रीगाधाभिः शम्स्यमानाय मङ्गलम् ॥ १७॥

फाल्गुनोत्तरफल्गुन्योश्चैत्रे चाहनि रौहिणे ।
तीर्थान्तादि महद्वन्द्व सेवनीयाय मङ्गलम् ॥ १८॥

भट्टनाथयतीन्द्रेण भक्तिभावितगोरथे ।
भव्यदेन्दिरया साकं भासमानाय मङ्गलम् ॥ १९॥

स्वर्णशैलसमानाभे पुण्यकोटिविमानके ।
कलिजिद्योगिन्सङ्कृते कान्ताहृष्टाय मङ्गलम् ॥ २०॥

सहकारवनाभोगे सह देव्या विहारिणे ।
वसन्तऋतुयात्रायां वानाद्रीशाय मङ्गलम् ॥ २१॥

व्याख्यातोभयवेदान्ते वानाचलमठे मुदा ।
वैष्णवाराधनान्नित्यं वर्धमानाय मङ्गलम् ॥ २२॥

श्रीभूमिगोदादेवीभिः साकं श्रिवरमङ्कया ।

दिव्यसिम्हासनस्थाय देवनाथाय मङ्गलम् ॥ २३॥

तोदाद्रिनाथसान्निध्ये गोपालार्यनिवेदितम् ।
मङ्गलं पठितॄणां श्रीवरमङ्का प्रसीदतु ॥ २४॥

॥ इति श्रीगोपाल अय्यंगारविरचितं तोदाद्रिनाथमङ्गलाशासनं सम्पूर्णम् ॥

*Shri Totadrinatha Mangalashasanam*

pdf was typeset on June 3, 2022

Please send corrections to *sanskrit@cheerful.com*